# संस्कृत-वार्ताः

## दिनाङ्कः-10.10.2025 सायम् - 06:20

**आदौ मुख्यवार्ताः**

- विदेशमन्त्रिणा डा.एस.जयशंकरेण नवदिल्ल्यां अफगानिस्तानस्य विदेशमन्त्रिणा मौलवी अमीर खान मुत्ताकी इत्यमुना सह वार्ता साधिता। अत्रावसरे भारत-अफगानिस्तानदेशौ प्रतिवेशी-देशैः उत्पद्यमानानां आतङ्क-कृत्यानां निन्दनं कृतवन्तौ।
- विंशत्यधिक-द्विसहस्रतमवर्षस्य नोबल-शान्तिपुरस्कारः मारिया कोरिना मचाडो इत्यस्मै प्रदत्तः।
- निर्वाचनायोगेन बिहार-विधानसभानिर्वाचनार्थं प्रथमचरणस्य अधिसूचना प्रकाशिता।
- रक्षामन्त्रिणा राजनाथसिंहेन प्रोक्तं यत् देशः संरचनात्मक-परिष्कारेषु विशेषतः विनिर्माण-क्षेत्रे परिवर्तनशील-यात्रायाम् अस्ति।
- क्रिकेट-क्रीडायां,पौरस्त्य-क्रीडकःयशस्वी-जैस्वाल: त्रयोसप्तत्यधिकैकशतं अङ्कं अवाप्य भारतस्य विजयं सुनिश्चितवान् ।

### अथ वार्ताः विस्तरेण

**जयशंकर-अफगानिस्तान**

विदेशमन्त्रिणा डा. एस. जयशंकरेण भारत-अफगानिस्तानदेशयोः आतङ्कवादं सम्मुखीकर्तुं सहयोगपूर्वकं कार्याचरणाय बलम् प्रदत्तम् । नवदिल्ल्यां अफगानिस्तानस्य विदेशमन्त्रिणा मौलवी अमीर खान मुत्तकी इत्यमुना सह उपवेशनावधौ स्वीये उद्घाटनभाषणे जयशंकरेण प्रोक्तं यत् उभावपि देशौ विकास-समृद्धिभ्यां प्रति समान-प्रतिबद्धताम् सन्धारयतः।

मन्त्रिणा प्रोक्तं यत् अफगानिस्तानस्य विकास-प्रगत्योः भारतस्य गहनरुचिः वर्तते। तेनोदीरितं यत् सर्वकारः अफगानिस्तानस्य सम्प्रभुतायै, क्षेत्रीय-अखण्डतायै , स्वतन्त्रतायै च पूर्णतया प्रतिबद्धोऽस्ति। सः प्रोक्तवान् यत् उभयोः देशयोः मध्ये घनिष्ठ-सहयोगः अफगानिस्तानस्य राष्ट्रिय-विकासेन सह क्षेत्रीय-स्थिरतायामपि योगदानं प्रददाति।

अत्रावसरे अफगानिस्तानस्य विदेशमन्त्रिणा प्रोक्तं यत् तस्य देशः कस्मैचिदपि अफगानिस्तानस्य भूमेः उपयोगं अन्य-देशानाम् विरुद्धं कार्याचरणाय नैव सहिष्यते। अमीर खान मुत्तकी इत्यनेन कथितं यत् अफगानिस्तानदेशेन भारतं विरुध्य न कदापि अपभाषितं सहैव भारतेन सह सर्वदापि उत्तमव्यवहारः आचरितः ।

विदेशमन्त्रिणा डॉ. एस. जयशंकरेण द्वाविंशतितम-अप्रैलमासस्य पहलगाम-आतङ्काक्रमणस्य निन्दायै अफगानिस्तानाय कार्त्तज्ञं प्रकटितम् । नवदिल्ल्यां डॉ. एस. जयशङ्करस्य तथैव अफगानिस्तानस्य विदेशमन्त्रिणः मौलवी अमीर खान मुत्ताकी इत्यनयोः मध्ये सम्पन्न-वार्तायाः अनन्तरं एकस्मिन् संयुक्त-वक्तव्ये उभौ पक्षौ क्षेत्रीय-देशेभ्यः उत्पद्यमानानाम् सर्वविध-आतङ्कवादी-कृत्यानां स्पष्टरूपेण निन्दाम् अकुरुताम्। तौ क्षेत्रे शान्तिम्, स्थिरताम् तथा पारस्परिक-विश्वासं संवर्धयितुम् महत्त्वं प्रत्यपादयताम्। अफगान-विदेशमन्त्रिणा पुनरुक्तं यत् अफगान-सर्वकारः कस्मैचिदपि समूहाय व्यक्तये वा भारतस्य विरुद्धम् अफगानिस्तानस्य क्षेत्रस्य उपयोगम् कर्तुम् अनुमतिं नैव दास्यति। विदेशमन्त्रिणा नंगरहार-कुनार-प्रान्तेषु सद्यः दुरापन्ने भूकम्पे जन-धन-हानिमालक्ष्य गहन-संवेदना प्रकटीकृता। अत्रावसरे उभय-पक्षाभ्याम् सांस्कृतिक-सम्पर्कं वर्धयितुम् विशेषतः क्रिकेट-क्रीडायाम्, सहयोगं सुदृढीकर्तुम् उपायाः अपि विचारिताः।

**नोबल**

विंशत्यधिक द्विसहस्रतमवर्षस्य नोबल-शान्तिपुरस्कारः मारिया कोरिना मचाडो इत्यस्मै प्रदत्तः। वेनेजुएला-देशस्य जनानां कृते लोकतान्त्रिक-अधिकाराणां प्रचारार्थं अतिशयकार्यस्य कृते पुरस्कारोऽयं प्रदत्त:। वेनेजुएला-देशे लौह-महिला इति नाम्ना अपि प्रसिद्धा मचाडो इत्येषा विंशत्यधिक द्विसहस्रतमवर्षस्य टैम- पत्रिकायाः शतप्रभावशालिनां जनानां सूच्यां सूचीबद्धा आसीत्।

**बिहार-निर्वाचनम्**

विधानसभानिर्वाचनस्य प्रथमचरणस्य अधिसूचना प्रकाशिता अभवत् । अनेनैव सह एकविंशत्यधिकैक-शतं विधानसभा-क्षेत्राणां प्रथमचरणस्य नामांकन-प्रक्रिया समारब्धा। प्रत्याशिनः अस्य मासस्य सप्तदश-दिनाङ्क-पर्यन्तं स्वनामांकन-पत्रं दातुं शक्नुवन्ति। अग्रिम-दिने नामांकन-पत्राणां परीक्षणं

भविष्यति। नामांकन-प्रत्यावर्तनस्य अन्तिमा तिथिः  अक्टूबर-मासस्य विंशतिः दिनाङ्कम् वर्तते। प्रथम-चरणे उत्तर-दक्षिण-बिहारस्य जनपदेषु मतदानं अक्टूबर-मासस्य षष्ठे -दिनाङ्के भविष्यति। निर्वाचनायोगेन नामांकन-केन्द्राणां परिसरस्य सुरक्षायै विशेषनिर्देशाः अपि निस्सारिताः।

आर.जे.डी-दलस्य नेत्रा तेजस्वी यादवेन प्रतिगृहम् एकं सर्वकारीयोद्योगं दातुं घोषणा कृता अपरत्र जे.डी.यु दलस्य नेत्रा राजीव-रंजनप्रसादेन एतत् मिथ्याप्रलापत्वेन प्रोक्तम्।

राज्ये विधानसभानिर्वाचनं द्वयोः चरणयोः भविष्यति। द्वितीयचरणस्य मतदानं नवम्बरमासस्य एकादश-दिनाङ्के भविष्यति, तथा च मतगणना अग्रिम-मासस्य चतुर्दश-दिनाङ्के भविष्यति।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**राजनाथ-आस्ट्रेलिया**

रक्षामन्त्रिणा राजनाथसिंहेन प्रोक्तं यत् देशः संरचनात्मक-परिष्कारेषु विशेषतः विनिर्माण-क्षेत्रे परिवर्तनशील-यात्रायाम् अस्ति। तेनोदीरितं यत् भारतम् अधुना विश्वस्य चतुर्थ-बृहत्तम-अर्थव्यवस्था तथैव तीव्रतम-विकासशीला अर्थव्यवस्था अस्ति। सिडनी-नगरे अद्य सम्पन्ने भारत-ऑस्ट्रेलिया- रक्षोद्योग-व्यापार-गोलमेज-सम्मेलने भाषमाणः श्री राजनाथसिंहः कथितवान् यत् नीतिगत-हस्तक्षेपैः तथा अनुपालन-तन्त्राणाम् सरलीकरणेन रक्षोत्पादन-पर्यावरण-प्रणाल्यपि निरन्तरं सरलीभवति। श्रीसिंहेन ऑस्ट्रेलियाई-व्यापार-समुदायः भारते निवेशाय, सहयोगाय तथा नूतनाविष्काराय च आमन्त्रितः। तेन प्रोक्तं यत् भारत-ऑस्ट्रेलिया-देशौ अत्याधुनिक-प्रौद्योगिकीनां विकासं कर्तुं शक्नुतः तथैव उन्नताधार-तन्त्रम् निर्मातुम् शक्तौ स्तः।

**प्रधानमन्त्री-द्विदल**

प्रधानमन्त्री नरेन्द्रमोदी श्वः नव-दिल्ली-नगरे पी.एम. धन- धान्य-योजना अपि च द्विदलधान्य-मिशन् इत्यस्मिन् स्वावलंबनम् इति द्वयोः प्रमुखयोः उपक्रमयोः आरम्भं करिष्यति। कृषि-मन्त्रालयः प्रख्यापितवान् यत् पी. एम्. धन-धान्य -कृषि-योजनायाः अन्तर्गतं, कृत्स्ने देशे शतशः न्यून-उत्पादक-मण्डलेषु समग्र-कृषि-विकासः भविष्यति, यस्य उद्देश्यं कृषकाणां आय: महत्त्वपूर्णरूपेण वर्धयितुं अस्ति। इयं हि योजना प्रत्येकस्य कृषिक्षेत्रस्य कृते सिञ्चन-सुविधाः सुनिश्चेतुं, सस्य-विविधीकरणं प्रवर्धयितुं, ऋण-सञ्चय-मूलसौकर्याणां सुलभप्रवेशनं च प्रदातुं प्रयतते।

**अमेरिका-पाकिस्तानौ**

अमेरिकादेशेन पाकिस्तानाय नवनिर्मित-उन्नत-मध्यमान्तरेण आकाशे-प्रहारक्षमाणां प्रक्षेपास्त्राणां आपूर्तिसन्दर्भे स्वीया आपत्तिः प्रकटिता। भारते स्थितेन अमेरिकी-दूतावासेन स्पष्टीकरण-वक्तव्ये प्रोक्तं यत् अमेरिकी-विदेशी-सैन्य-विक्रय-अनुबन्धे सद्यः सम्पन्ने संशोधनं इस्लामाबादाय नवीनानां शस्त्र-प्रणालीनां हस्तान्तरणं नैवास्ति। दूतावासेन कथितं यत् एतत् संशोधनं केवलं संरक्षणं तथैव अतिरिक्त-भागानाम् समर्थनं यावदेव सीमितम् अस्ति, तथा च तस्य शस्त्रागारे काचिदपि क्षमता-वृद्धिः अथवा उन्नयनम् नैव क्रियते।

**क्रिकेट-क्रीडायां**

क्रिकेट-क्रीडायां, पौरस्त्य क्रीडकः यशस्वी-जैस्वाल: त्रयोसप्तत्यधिकैकशतं अङ्कं अवाप्य भारतस्य विजयं सुनिश्चितं अकरोत्। इयं हि क्रीडा अरुण जेटली क्रीडांगणे अभवत्। इत: प्राक् , भारतीय-नायकः गिल् इत्येषः पणकं जित्वा कृष्णमृत्तिकायां प्रथमं क्रीडनं चितवान्, यतोहि तद् अनुकूलम् आसीत्। अहमदाबाद्-नगरे श्रृङ्खलायाः आरम्भे निर्णायकविजयस्य अनन्तरं, भारतीयदलं अन्येन प्रमुखप्रदर्शनेन गृहश्रृङ्खलायां अद्वितीयं प्रदर्शनं कर्तुं सज्जं अस्ति।

**॥ इति वार्ता ॥**